प्रज्ञाविवर्धन कार्तिकेय स्तोत्रं

प्रज्ञाविवर्धन कार्तिकेय स्तोत्रं

स्कंद उवाच |
योगीश्वरो महासेनः कार्तिकेयोऽग्निनंदनः |
स्कंदः कुमारः सेनानीः स्वामी शंकरसंभवः || 1 ||

गांगेयस्ताम्रचूडश्च ब्रह्मचारी शिखिध्वजः |
तारकारिरुमापुत्रः क्रौंचारिश्च षडाननः || 2 ||

शब्दब्रह्मसमुद्रश्च सिद्धः सारस्वतो गुहः |
सनत्कुमारो भगवान् भोगमोक्षफलप्रदः || 3 ||

शरजन्मा गणाधीशपूर्वजो मुक्तिमार्गकृत् |
सर्वागमप्रणेता च वांछितार्थप्रदर्शनः || 4 ||

अष्टाविंशतिनामानि मदीयानीति यः पठेत् |
प्रत्यूषे श्रद्धया युक्तो मूको वाचस्पतिर्भवेत् || 5 ||

महामंत्रमयानीति मम नामानुकीर्तनं |
महाप्रज्ञामवाप्नोति नात्र कार्या विचारणा || 6 ||

इति श्रीरुद्रयामले प्रज्ञाविवर्धनाख्यं श्रीमत्कार्तिकेयस्तोत्रं ||